# Nrisimha Stavarajah

# નૃસિંહસ્તવરાજઃ ૨

## Document Information

Text title : Nrisimha Stavarajah

File name : nRRisiMhastavarAjaH2.itx

Category : vishhnu, dashAvatAra, stavarAja, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# નૃસિંહસ્તવરાજઃ ૨

સર્વજ્ઞં વેદકર્તારં પુરાણપુરુષોત્તમમ્ ।
પપૃચ્છુઃ મુનયઃ કૃષ્ણં કૃપાલું ભક્તવત્સલમ્ ॥ ૧॥

ભગવાન્ ભૂતભવ્યેશ સર્વજ્ઞ કરૂણાનિધે ।
કિં તત્ત્વં કિં પરં જાપ્યં ધ્યાનં કિં મુક્તિસાધનમ્ ॥ ૨॥

શ્રોતુમિચ્છામિ હે દેવ તદ્વદ સર્વસાધનમ્ ।
સર્વભાવેન જાતસ્ત્વાં શરણ્યં શરણં પ્રભો ॥ ૩॥

શ્રીકૃષ્ણ ઉવાચ ।
સચ્ચિદાનન્દમદ્વૈતં સ્વપ્રકાશં પરં શિવમ્ ।
યજ્જ્યોતિજ્યોતિષાં પૂર્ણં તત્તત્વં શ્રુતયો વિદુઃ ॥ ૪॥

શ્રીનૃસિંહસ્તવાન્નાન્યત્ તત્ત્વં જાપ્યં પરં વિદુઃ ।
સર્વદુઃખહરં જ્ઞાનદાયકં ભોગસાધનમ્ ॥ ૫॥

અથ જ્ઞાનં પ્રવક્ષ્યામિ સર્વાભીષ્ટપ્રદાયકમ્ ।
નૃસિંહસ્તવરાજેન સર્વપાપહરં પરમ્ ॥ ૬॥

મહાચક્રસ્ય નાભિસ્થં ક્ષીરસાગરમધ્યગમ્ ।
શ્વેતદ્વીપે મહાદિવ્યે પ્રાસાદે રત્નશોભિતે ॥ ૭॥

સિંહાસનસમારૂઢં છત્રીભૂતં ફણીન્દ્રકમ્ ।
ત્ર્યક્ષં ચક્રપિનાકાઢ્યં સર્વદાઽભયદાયકમ્ ॥ ૮॥

શરચ્ચન્દ્રનિભં સ્વચ્છં નીલકણ્ઠં મનોહરમ્ ।
સદા કેસરસંવીતં વિકટભ્રૂયુતં શિવમ્ ॥ ૯॥

યોગારૂઢં પ્રસન્નાસ્યં ચન્દ્રમૌલિં કૃપાકરમ્ ।
નૃસિંહં પરમાનન્દં સત્યજ્ઞાનસ્વરૂપિણમ્ ॥ ૧૦॥

પ્રહ્લાદવરદં દેવં ચિન્તયામિ પરાત્પરમ્ ।

ઇન્દ્રાદિભિસ્સ્તુતં લક્ષ્મ્યા સેવિતં ભૂષણોજ્જ્વલમ્ ॥ ૧૧॥

પીતામ્બરધરં દેવં ચારુદંષ્ટ્રં સુલોચનમ્ ।
શ્રીવત્સકૌસ્તુભોપેતં વનમાલાવિભૂષિતમ્ ॥ ૧૨॥

એવં ધ્યાત્વા નૃસિંહાખ્યં પરં બ્રહ્મસનાતનમ્ ।
સન્તુષ્ટહૃદયો મૂર્ધ્નિ કૃતાઞ્જલિરિદં પઠેત્ ॥ ૧૩॥

નૃસિંહસ્તવરાજં ચ સર્વકામપ્રદં શિવમ્ ।
સર્વારિષ્ટહરં દિવ્યં દુષ્ટનાશનમુત્તમમ્ ॥ ૧૪॥

ૐ અસ્ય શ્રીનૃસિંહસ્તવરાજસ્ય શ્રીકૃષ્ણઃ ઋષિઃ ।
શ્રીલક્ષ્મીનૃસિંહો દેવતા ।
અનુષ્ટુપ્ છન્દઃ । શ્રીનૃસિંહપ્રીત્યર્થે જપે વિનિયોગઃ ॥

ૐકારાક્ષં શિવં પૂર્ણં નારસિંહં કૃપાકરમ્ ।
નિર્વિકારં પરં ધામ ચિન્તયામિ પરાત્પરમ્ ॥ ૧૫॥

સત્યં જ્ઞાનપરં બ્રહ્મ યત્ફલં યમનન્તકમ્ ।
એવં સદોદિતં શાન્તં નિર્મલં નિષ્કલં પરમ્ ॥ ૧૬॥

નિરઞ્જનં નિરાકારમખણ્ડં તમસઃ પરમ્ ।
ભક્તાનુગ્રહકર્તારં પ્રહ્લાદવરદં પ્રભુમ્ ॥ ૧૭॥

અસાધ્યસર્વરોગઘ્નં સમસ્તાસુરનાશનમ્ ।
કૃતાન્તવાહનં ભીમં કાલમૃત્યુનિવારણમ્ ॥ ૧૮॥

ભીષણં વિકટં શાન્તં દુષ્ટગ્રહનિવારણમ્ ।
સર્વાક્ષોભ્યં મહાવિષ્ણું નારાયણમનામયમ્ ॥ ૧૯॥

દેવદાનવદુર્દર્શ્યં જગદ્રક્ષકરક્ષણમ્ ।
ઉગ્રસિંહં સદાશાન્તં સ્મૃતિમાત્રાખિલપ્રદમ્ ॥ ૨૦॥

ૐકારરૂપં ત્રિદશાધિનાથં બ્રહ્મસ્વરૂપં વિમલં પ્રશાન્તમ્ ।
અનન્તમેકં પરિપૂર્ણરૂપં સ્મરામિ રામં પ્રણમામિ સિંહમ્ ॥ ૨૧॥

પિઙ્ગોર્ધ્વકેશં વિવૃતાનનં તં પિઙ્ગત્રિનેત્રં ધવલં સુસૌમ્યમ્ ।
નમામિ સિંહં પરમેશ્વરં વૈ સત્યાધિરૂપં નિહિતં ગુહાયામ્ ॥ ૨૨॥

મોક્ષૈકહેતું પરમં શરણ્યં ભૃત્યાર્તિનાશં જગદેકહેતુમ્ ।
આનન્દરૂપં વિતતં ચ પૂર્ણં નમામિ સિંહં પરમં દ્વિતીયમ્ ॥ ૨૩॥

નારાયણં વૈ રઘુનાથમેકં બ્રહ્મસ્વરૂપં વિવિધાત્મરૂપમ્ ।
નિત્યં નિદાનં પરમીશિતારં મત્સ્યાદિરૂપં પ્રણમામિ સિંહમ્ ॥ ૨૪॥

રાજાધિરાજં રઘુનાથમીશં શ્રીરામચન્દ્રં શરણં નૃસિંહમ્ ।
શ્રીવાસુદેવં શિખિપિચ્છચૂડં સુવેણુવાદ્યં નિરતં મહાન્તમ્ ॥ ૨૫॥

વિશ્વૈકદીપં જ્વલનાર્કદીપ્તિં જાજ્વલ્યમાનં મહસા પરેણ ।
શ્રીદિવ્યસિંહં મહતામ્મહાન્તં હિરણ્યગર્ભં શરણં પ્રપદ્યે ॥ ૨૬॥

વૈરાજરૂપં પુરૂષં પુરાણં સહસ્રશીર્ષં શતપત્રપાદમ્ ।
બ્રહ્મેશરૂપં કૃતવિશ્વમીડ્યં નૃસિંહમાદ્યં પરિપૂર્ણમીડે ॥ ૨૭॥

અન્નાદિકોશં જગદદ્વિતીયં પુચ્છં નૃસિંહં શરણં શરણ્યમ્ ।
જ્ઞાનૈકલભ્યં સુધિયાં હિ પુંસાં ધર્માદિહેતું શરણં પ્રપદ્યે ॥ ૨૮॥

બ્રહ્મા વિષ્ણુર્મહેશસ્ત્વમિન્દ્રો વહ્નિર્યમસ્તથા ।
વરુણો વાયુરીશાનઃ કુબેરો હરે પ્રભો ॥ ૨૯॥

સૂર્યાદિગ્રહરૂપસ્ત્વં નૃહરે ગુરુરૂપધૃક્ ।
મન્ત્રરાજસ્વરૂપસ્ત્વં સામરાજ નમોઽસ્તુ તે ॥ ૩૦॥

પિતા માતા સુહૃદ્ બન્ધુર્નૃહરે ત્વં સદા મમ ।
ત્વમેવ સકલં બ્રહ્મન્ ત્વાં વિના નાસ્તિ મે ગતિઃ ॥ ૩૧॥

માતૃકા પ્રણવાદિશ્ચ સર્વમન્ત્રમયાચ્યુત ।
સર્વદેવમયાચિન્ત્ય સિંહાસ્યાય નમોઽસ્તુ તે ॥ ૩૨॥

શ્રીકૃષ્ણ ઉવાચ ।
અનેન સ્તવરાજેન નૃસિંહો ભક્તવત્સલઃ ।
તતઃ પ્રીતઃ પ્રસન્નોઽભૂત્ ભક્તેભ્યઃ પુરુષોત્તમઃ ॥ ૩૩॥

શ્રીનૃસિંહ ઉવાચ ।
ભો ભો ભક્તવરાઃ સર્વે શ્રૃણુધ્વં વરમુત્તમમ્ ।
અહં ભક્તપરાધીનો અન્યેષામતિદુર્લભઃ ॥ ૩૪॥

ભક્તા ઊચુઃ ।
યદિ નોઽસિ પ્રસન્નસ્ત્વં દેવદેવ કૃપાનિધે ।
ત્વમેવ નિતરાં દેહિ ત્વયિ ભક્તિં દૃઢાં પ્રભો ॥ ૩૫॥

શ્રીનૃસિંહ ઉવાચ ।
શ્રૂયતાં સાવધાનેન ભક્તિર્વોઽસ્તુ સદા મયિ ।
અન્યચ્ચ શ્રૂયતાં વિપ્રાઃ યેન પ્રીતો ભવામ્યહમ્ ॥ ૩૬॥

અનેન સ્તવરાજેન શ્રદ્ધયા કૃતનિશ્ચયઃ ।
યઃ સ્તૌતિ દીક્ષિતઃ ભક્તઃ તસ્યાહં કામપૂરકઃ ॥ ૩૭॥

એકકાલં ત્રિકાલં વા ચતુર્દશ્યામથાપિ વા ।
સ્વાત્યાં તુ મન્દવારે ચ સ્તોત્રમેતત્પઠન્તિ યે ॥ ૩૮॥

ઇપ્સિતં સફલં તેષાં ભવત્યેવ ન સંશયઃ ।
અનિષ્ટસ્ય ચ વાર્તાપિ શ્રૂયતે તૈર્ન ચ ક્વચિત્ ॥ ૩૯॥

ભક્તા ઊચુઃ ।
સર્વાન્તર્યામિણાં દેવ હરે ચૈતન્યરૂપિણા ।
યો હિ દત્તો વરોઽસ્મભ્યં સત્યોઽયં ત્વત્પ્રસાદતઃ ॥ ૪૦॥

ઇતિ કૃષ્ણેન સમ્પ્રોક્તો ઋષિભ્યો નૃહરે સ્તવઃ ।
પ્રીયતાં તેન દેવેશો નૃસિંહો ભક્તવત્સલઃ ॥ ૪૧॥

ઇતિ શ્રીકૃષ્ણઋષિસંવાદે શ્રીનૃસિંહસ્તવરાજઃ સમ્પૂર્ણઃ ।

Proofread by M K Barman

*Nrisimha Stavarajah*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*